# Bakuci

अवल्गुजा वाकुची स्यात्सोमराजी सुपर्णिका ।
शशिलेखा कृष्णाफला सोमा पूतफलीति च ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता । (Bpn)

Avalguja, Bakuci, Somaraji, Suparnika, Sasilekha, Krsnaphala, Soma, Putaphata, Somavalli, Kalamesi, Kusthaghni are the synonyms of bakuci.

बाकुची सोमराजी च सोमवल्ली सुवल्लिका ।
सिता सितावरी चन्द्रलेखा चान्द्री च सुप्रभा ॥
कुष्ठहन्त्री च काम्बोजी प्रतिगन्धा चावल्गुजा ।
स्मृता चन्द्राभिधा राजी काल्माषी च तथैन्दवी ॥
कुष्ठदोषहा चैव कान्तिदाऽवल्गुजा तथा ॥
चन्द्राभिधा प्रभायुक्ता विंशतिः स्यातु नामतः । (Rjn)

Bakuci, Somaraji, Somavalli, Suvallika, Sita, Sitavari, Candralekha, Candi, Suprabha, Kusthahantri, Kamaboji, Pratigandha, Avalguja, Candrabhidha, Raji, KAlmasi, Eaindavi, Kusthadoshaha, Kantida, Avalguja, Candrabhidha, Prabhayukta are the 20 synonyms of bakuci.

वाकुची सोमराजी तु सोमवल्ली सुवल्यपि ।
अवल्गुजा कृष्णफला सैव पूतिफला मता ॥
चन्द्रलेखेन्दुलेखा च शशिलेखा मता च सा ।
पूतिकर्णी कालमेषी दुर्गन्धा कुष्ठनाशिनी ॥ (Dhn)

Bakuci, Somaraji, Somavalli, Suvalya, Avalguja, Krsnaphala, Putiphala, Candralekha, Indulekha, Sasilekha, Putikarni, Kalamesi, Durgandha, Kusthanasini are its synonyms.

वाकुची पाके कटुका तिक्ता शीता रसायनी ।
मधुरा रुचिदा रूक्षा हृद्या ग्राह्यग्निदीपनी ॥
बल्या च तुवरा लघ्वी मेध्या वै रक्तपित्तजित् ।
कफकुष्ठकृमिश्वासकासमेहज्वरव्रणान् ॥
त्रिदोषवातत्वग्दोषविषकण्डूश्च नाशयेत् । (Sgn)

Bakuci is tikta, madhura, tuvara in rasa, ruksa, laghu in guna, sita in veerya, katu in paka, rasayani, rucida, hrdya, grahya, agni dipani, balya, medhya, alleviates raktapitta, kapha, kustha, krmi, svasa, kasa, meha, jvara, vrana, tridosha, vata, tvagdosha, visa and kandu.

वाकुची कटुतिक्तोष्णा कृमिकुष्ठकफापहा ।
त्वग्दोषविषकण्डूऽतिखतिखर्जूप्रशमनी च सा ॥ (Rjn)

Bakuci is katu, tikta in rasa, usna in veerya, alleviates krmi, kustha, kapha, tvagdosha, visa, kandu and ati-kharju.

वाकुची मधुरा तिक्ता कटुपाका रसायनी ।
विष्टम्भीहृद्धिमा रुच्या सरा श्लेष्मास्त्रपित्तनुत् ॥
रूक्षा हृद्या श्वासकुष्ठमेहज्वरकृमिप्रणुत् ।

तत्फलं पित्तलं कुष्ठकफानिलहरं कटु ॥
केश्यं त्वच्यं वामिश्वासकासशोथामपाण्डुनुत् ॥ (Bpn)

Bakuci is madhura, tikta in rasa, ruksa in guna, katu in paka, sara in karma, rasayani, vistambhi, hrdya, rucya, alleviates slesma, asra, pitta, svasa, kustha, meha, jvara and krmi.

Its fruit is katu in rasa, increases pitta, kesya, tvacya in karma, alleviates kustha, kapha, vami, svasa, kasa, sotha, ama and pandu.

वाकुची शीतला तिक्ता श्लेष्मकुष्ठकृमीन् जयेत् ।
रसायोोपयुक्ता च रुचिमेधाविवर्धनी ॥ (Dhn)

Bakuci is tikta in rasa, sitala in veerya, ruci-meda vivardhini, rasayana, alleviates slesma, kustha and krmi.

अवल्गुजः कटुः पाके तिक्तः पित्तकफापहः । (Su.S.Su ४६)

Avalguja is tikta in rasa, katu in paka and pitta kapha hara.

तीव्रेण कुष्ठेन परितमूर्ति
    र्यः सोमराजीं नियमेन खादेत् ।
संवत्सरं कुष्णतिलद्वितीयां
    स सोमराजीं वपुषाऽतिशेते ॥
ये सोमराज्याः वितुषीकृत्ताया -
    श्चूर्णौरुपेतात् पयसः सुजातात् ।
उद्धृत्यसारं मधुना लिहन्ति
    तक्रं तदेवानुपिबन्ति चेते ॥
कुष्ठिः कुष्यमाणाङ्गास्ते जाताङ्गुलिनासिकाः ।
भान्ति वृक्षा इव पुनः प्ररूढनवपल्लवाः ॥ (Ah U ३९)

The one suffering from kustha spread all over the body, should consume somaraji added with krsna taila in the prescribed manner for one year, becomes not only cured of it but even excels moon light in complexion. Somaraji seeds are dehusked, powdered and added to milk, which is curdled and churned. Its essence is then prepared and licked along with honey, follwed by drinking of the same buttermilk. By doing this patients of leprosy whose body parts are withering away, who have loss of fingers and nose, regain them soon, like trees bringing new sprouts.

बाकुची तुवरी तिक्ता कटुपाका हिमा लघुः ।
दापनी मधुरा रूक्षा रुच्या हृद्या रसायनी ॥

विष्टम्भिनी सरा मेध्या रक्तपित्तकफापहा ।

Bakuci is tuvara, tikta, madhura in rasa, laghu, ruksa in guna, hima in veerya, katu in vipaka, dipani, rucya, hrdya, rasayani, vistambhini, sara, medhya, alleviates rakta pitta, kapha, kustha, krmi, svasa, kasa, meha, vara and aruci.
Its phala is kesya, tvacya, cures krmi, svasa, sotha and pandu.